






गी॰
१

ॐनमोभगवतेवासुदेवा-
य ॐअस्यश्रीभगवद्गीतामा-
लामंत्रस्य श्रीभगवान्वे-

द्व्यासऋषिः अनुष्टुपछंदः श्रीकृष्ण
परमात्मादेवता अशोच्यानन्वशोचस्त्वं
प्रज्ञावादांश्चभाषसेतिबीजं सर्वधर्मा
न्परित्यज्यमामेकंशरणंव्रजेतिशक्तिः
अहंत्वासर्वपापेभ्योमोक्षयिष्यामिः

गी.
२

माशुचेतिकीलकं॥ नैनंछिंदंतिशस्त्रा
णिनैनंदहतिपावकः॥ इत्यंगुष्ठाभ्यां
नमः॥ नचैनंक्लेदयंत्यापोनशोषय
तिमारुतः॥ इतितर्जनीभ्यांनमः॥ अ
छेद्योयमदाह्योयमक्लेद्योशोष्यएव

चेतिमध्यमाभ्यां नमः॥ नित्यःसर्वेग

तस्यागवलोधेसनातनः॥ इतिना·

मिकाभ्यां नमः॥ पद्मपमेपाधेद्दपाणि

श्रातश्रोत्रसहस्रघाः॥ इतिकनिष्ठका

भ्यां नमः॥ नानाविधानिदिव्यानिना·

ली

नावलोकितीनिवेतिकरतलकरपृ
ष्ठाभ्यांनमः इतिकरन्यासः॥ नैनेछिदं
तिषांस्वाणीतिहृदयायनमः॥ नैवेद
नैदयस्वाणीरतिशिरसेस्वाहा॥ यवे
षायमहालायमितिशिखायैवषट्।

निम्नंसर्वेगतःस्यागोरितिकववायइं
पथ्यंसेपार्थंरूपाणोतिनेत्रयायैवो
षट्नानाविधानिदिव्यानीत्यम्रायफट् श्रीक्रम्म
प्रीत्यैर्थंजपेविलियोगः श्रियव्याणो पा
र्धायपत्रतिवोयितामवावतानावायो

गी
७

तस्वयं॥ व्यासेनग्रथितापुराणमुनि·
नामध्येमहाभारते अद्वैतामृतवर्षिणींभग
वतीमष्टादशाध्यायिनी॥मंबत्वामनु
संदधामिभगवद्गीतेभवद्वेषिणीं नमोस्तुतेव्या
सविशालबुद्धेफुल्लारविंदायतपत्रनेत्र

येनत्वयाभारततैलपूर्णःप्रज्वालि-
तोज्ञानमयःप्रदीपः॥२॥प्रपंनपारिजा-
तायतोत्रवेत्रैकपाणये॥ज्ञानमुद्राय-
कृष्णायगीतामृतदुहेनमः॥३॥सर्वोप-
निषदोगावोदोग्धागोपालनंदनः॥

गी
५

पार्थो वत्सः सुधी भोक्ता दुग्धं गीतामृ-
तं महत् ॥४॥ वसुदेवसुतं देवं कंसचा-
णूरमर्दनं ॥ देवकीपरमानंदं कृष्णं
वंदे जगद्गुरुं ॥५॥ भीष्मद्रोणतटा
जयद्रथजला गांधारनीलोत्पला ॥

शल्यग्राहवतीकृपेणवहिनीकर्णेन
वेलाकुला॥ अश्वत्थामविकर्णघोर
मकरादुर्योधनावर्तिनी॥ सोत्तीर्णाख
लुपांडवैःरणनदीकैवर्तकः केशवः ८
पाराशर्यवचःसरोजममलंगीतार्थ

लंपंगुंलंघयतेगिरिं॥ यत्कृपातमहं
वंदेपरमानंदमाधवं॥ ८॥ यंब्रह्मावरु
णेंद्ररुद्रमरुतस्तुन्वंतिदिव्यैस्तवै॥ वे
दैःसांगपदक्रमोपनिषदैर्गायंति
यंसामगाः॥ ध्यानावस्थिततद्गतेन·

मनसा पश्यंति यं योगिनो ॥ यस्यांतं
न विदुः सुरासुरगणा देवाय तस्मै न
मः ॥ इति ध्यानं ॥ धृतराष्ट्र उवाच ॥ धर्मक्षेत्रे कु
रुक्षेत्रे समवेता युयुत्सवः मामकाः
पांडवाश्चैव किमकुर्वत संजय ॥ १

संजयउवाच। दृष्टातुपांडवानीकंव्यूढंदु-
र्योधनस्तदा॥ आचार्यमुपसंगम्यरा-
जावचनमब्रवीत॥२॥ पश्यैतांपांडु-
पुत्राणामाचार्यमहतींचमूं॥ व्यूढंद्रु-
पदपुत्रेणतवशिष्येणधीमता॥३॥

अत्र शूरा महेष्वासा भीमार्जुनसमा
युधि॥ युयुधानो विराटश्च द्रुपदश्च
महारथः॥४॥ धृष्टकेतुश्चेकितानः
काशीराजश्च वीर्यवान्। पुरुजित्कुंति
भोजश्च शैब्यश्च नरपुंगवः। युधामन्यु

श्चविक्रांतउत्तमौजाश्चवीर्यवान॥सौ
भद्रोद्रौपदेयाश्चसर्वेएवमहारथाः॥६
अस्माकंतुविशिष्टायेतान्निबोधद्वि
जोत्तमः॥नायकाममसैन्यस्यसंज्ञार्थं
तान्ब्रवीमिते॥७॥भवान्भीष्मश्चकर्ण

गी
९

श्चकृपश्च समितिंजयः ॥ अश्वत्थामा
विकर्णश्च सौमदत्तिस्तथैव च ॥ अन्ये
च बहवः शूरा मदर्थे त्यक्तजीविताः
नानाशस्त्रप्रहरणाः सर्वे युद्धविशार-
दाः ॥ ९ ॥ अपर्याप्तं तदस्माकं बलं

श्रीक्षामिरक्षितं ॥ पश्यामेविष्टमेतेषां
बलं श्रीमाभिरक्षितं ॥१॥ ध्यायतेश्रुवस
वैश्रुवयामागमवास्थिताः ॥ श्रीक्षमे
वाभिरक्षितंतत्रभवंतः सर्वपर्वाहिः ॥१॥ त
स्यसंजनयन्त्दंशैककलहदःपितामहः ॥

गी
१०

सिंहनादंविनद्योच्चैःशंखंदध्मौप्रता-
पवान्॥१२॥ततःशंखाश्चभेर्यश्चपणवा
नकगोमुखाः॥सहसैवाभ्यहं-
न्यंतसशब्दस्तुमुलोभवत्॥ततःश्वे
तैर्हयैर्युक्तेमहतिस्यंदनेस्थितौ॥

माधवःपांडवश्चैवदिव्यौशंखौप्रद-
ध्मतुः॥४॥पांचजन्यंहृषीकेशोदेव-
दत्तंधनंजयः॥पौंड्रंदध्मौमहाशंखं-
भीमकर्मावृकोदरः॥१५॥अनंतवि-
जयंराजाकुंतीपुत्रोयुधिष्ठिरः॥नकु

लसहदेवश्चसुघोषमणिपुष्पकौ॥
काश्यश्चपरमेष्वासःशिखंडीचम
हारथः॥धृष्टद्युम्नोविराटश्चसात्यकि
श्चापराजितः॥द्रुपदोद्रौपदेयाश्चसर्व
शःपृथिवीपते॥सौभद्रश्चमहाबाहुः

शंखांदध्मुःपृथक्पृथक्॥१८॥सघोषोधा
र्तराष्ट्राणांहृदयानिव्यदारयत्॥ १
नभश्चपृथिवींचैवतुमुलोव्यनुनाद
यन्॥१९॥अथव्यवस्थितांदृष्ट्वाधार्त
राष्ट्रान्कपिध्वजः॥प्रवृत्तेशस्त्रसंपाते

गी
१२

धनुरुद्यम्य पांडवः॥२०॥ हृषीकेशं त
दा वाक्यमिदमाह महीपते॥ सेनयोरु
भयोर्मध्ये रथं स्थापय मेच्युतः॥ याव
देतान्निरीक्षेहं योद्धुकामानवस्थितान्॥
कैर्मया सह योद्धव्यमस्मिन्रणसमु

द्यमे ॥२२॥ योत्स्यमानानवेक्षेहं य एते-
त्र समागताः ॥ धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे
प्रियचिकीर्षवः ॥२३॥ संजय उवाच ॥ एव-
मुक्तो हृषीकेशो गुडाकेशेन भारतः
सेनयोरुभयोर्मध्ये स्थापयित्वा रथो

गी
१२ त्तमं ॥ भीष्मद्रोणप्रमुखतः सर्वेषां च
महीक्षितां ॥ उवाच पार्थ पश्यैतान्स
मवेतान्कुरूनिति ॥ तत्रापश्यत्स्थितां
पार्थः पितॄनथ पितामहान् ॥ आचार्यां
मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा १९

खसमवात्महलटष्टैवमेनयोकमयोवं
पि॥तात्समोत्पसकोंनेवस्मवोंत्वंधं
नवस्यितात॥२४॥क्रपयापरयाविधे
विधीदैनिटमत्ववीन॥पंडिनवाव॥ह
हेमेस्वजनेंक्मस्पप्रत्लंसमस्पपास्यिंतं १८

गी
१४

सीदंति मम गात्राणि मुखं च परिशु
ष्यति ॥ वेपथुश्च शरीरे मे रोमहर्षश्च
जायते ॥ २९ ॥ गांडीवं स्रंसते हस्ता-
त्वक्चैव परिदह्यते ॥ न च शक्नोम्य
वस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥

निमित्तानि च पश्यामि विपरीतानि के·
शव ॥ न च श्रेयोनुपश्यामि हत्वा स्व
जनमाहवे ॥ ३१ ॥ न कांक्षे विजयं कृष्ण न
च राज्यं सुखानि च ॥ किं नो राज्येन गो·
विंद किं भोगैर्जीवितेन वा ॥ ३२ ॥ येषां·

गी
१५

मर्थेकांक्षितंनोराज्यंभोगाःसुखानि
च॥तइमेवस्थितायुद्धेप्राणांस्त्यक्त्वा
धनानिच॥आचार्याःपितरःपुत्राःस्त
थैवचपितामहाः॥मातुलाःश्वशुराःपौ
त्राःश्यालाःसंबंधिनस्तथा॥एतान्नहं

तुमिच्छामि घ्नतोपि मधुसूदन॥ अपि
त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते
निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्ज
नार्दन॥ पापमेवाश्रयेदस्मान्हत्वैता-
नाततायिनः॥ ३५॥ तस्मान्नार्हा वयं ह

गी
१९

न्तुंधार्तराष्ट्रान्स्वबांधवान् ॥ स्वजनंहि
कथंहत्वासुखिनःस्याममाधव ॥ य
द्यप्येतेनपश्यंतिलोभोपहतचेत-
सः ॥ कुलक्षयकृतंदोषंमित्रद्रोहेच-
पातकं ॥ ३८ ॥ कथंनज्ञेयमस्माभि:

पापादस्मान्निवर्तितुं॥ कुलक्षयकृतं
दोषं प्रपश्यद्भिर्जनार्दन॥३९॥ कुलक्षये
प्रणश्यंति कुलधर्माः सनातनाः॥ धर्मे
नष्टे कुलं कृत्स्नमधर्मोभिभवत्युत॥ १९
अधर्माभिभवात्कृष्ण प्रदुष्यंति कुल

गी
१८

स्त्रियः॥ स्त्रीषुदुष्टासुवार्ष्णेयजायतेव
र्णसंकरः॥ संकरोनरकायैवकुलघ्ना
नांकुलस्यच॥ पतंतिपितरोह्येषां
लुप्तपिंडोदकक्रियाः॥४॥ दोषैरे
तैःकुलघ्नानांवर्णसंकरकारकैः॥

उत्साद्यंतेजातिधर्माःकुलधर्माश्च

शाश्वताः॥उत्सन्नकुलधर्माणांमनु ष्याणां

जनार्दन॥नरकेनियतंवासोभव

तीत्यनुशुश्रुमः॥अहोबतमहत्पाप

कर्तुंव्यवसितावयं॥यद्राज्यसुखलो

गी. १६

लोभेनहंतुंस्वजनमुद्यताः॥ यदिमा
मप्रतीकारमशस्त्रंशस्त्रपाणयः
धार्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरं
भवेत्॥ ४६॥ संजयउवाच॥ एवमु
क्त्वार्जुनःसंख्येरथोपस्थउपाविशत्

विसृज्यसशरंचापंशोकसंविग्नमा
नसः ४७। इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृ
ष्णार्जुनसंवादेऽर्जुनविषादोनामप्र
थमोध्यायः। ॥संजयउवाच॥ तंतथाकृ

गी पयाविष्टमश्रुपूर्णाकुलेक्षणं ॥ विषी
१९ दंतमिदंवाक्यमुवाचमधुसूदनः ॥१॥
श्रीभगवानुवाच ॥ कुतस्त्वाकश्मलमि
दंविषमेसमुपस्थितं ॥ अनार्यजुष्ट
मस्वर्ग्यमकीर्तिकरमर्जुन ॥२॥

क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपप
द्यते॥ क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ
परंतप॥३॥ अर्जुन उवाच॥ कथं भीष्ममहं सं
ख्ये द्रोणं च मधुसूदन॥ इषुभि
प्रतियोत्स्यामि पूजार्हावरिसूदन॥४॥

गुरूनहत्वाहिमहानुभावांश्रेयोभो-
क्तुंभैक्षमपीहलोके॥हत्वार्थकामां
स्तुगुरूनिहैवभुंजीयभोगान्रुधिरप्र
दिग्धान्॥५॥नचैतद्विद्मःकतरन्नोग
रीयोयद्वाजयेमयदिवानोजयेयुः॥

यानेवहत्वानजिजीविषामस्तेवस्थि
ताप्रमुखेधार्तराष्ट्राः॥६॥कार्पण्यदो
षोपहतस्वभावःपृछामित्वांधर्म
संमूढचेताः॥यछ्रेयस्यान्निश्चितंब्रू
हितन्मेशिष्यस्तेहंशाधिमांत्वांप्रप

गी
२१

त्रे॥ नहिट्ठपयप्पमामिमसमापनुघायघेक
कम्भेबणाणिंदियाणं॥ स्ववाख्यम्र
मावसपतु मृहंवाज्यसवाणामपिर
चाथिपत्थे॥ ८॥ संजेपुबाव॥ पवक्ख
कालधीकेपांवडाकेपाःपरंतप॥

नयोत्स्यइतिगोविंदमुक्त्वातूष्णींब-
भूवह॥ तमुवाचहृषीकेशःप्रहसं-
निवभारत॥ सेनयोरुभयोर्मध्येवि-
षीदंतमिदंवचः॥ श्रीभगवानुवाच॥
अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्च

गी.
१२

भाषसे॥गतासूनगतासूंश्चनानुशो
चंतिपंडिताः॥नत्वेवाहंजातुनासंन
त्वंनेमेजनाधिपाः॥नचैवनभवि
ष्यामःसर्वेवयमतःपरं॥१२॥देहिनो
स्मिन्यथादेहेकौमारंयौवनंजराः॥

तथादेहांतरप्राप्तिधीरस्तत्रनमुह्य-
ति॥१३॥मात्रास्पर्शास्तुकौंतेयशीतो-
ष्णसुखदुःखदाः॥आगमापायिनो-
नित्यास्तांस्तितिक्षस्वभारत॥यंहिन
व्यथयंत्येतेपुरुषंपुरुषर्षभ॥समदुः-

गी
२२

दुःखसुखंधीरंसोमृतत्वायकल्प-
ते॥१५॥नासतोविद्यतेभावोनाभावो
विद्यतेसतः॥उभयोरपिदृष्टोंतस्त्व
नयोस्तत्त्वदर्शिभिः॥१६॥अविना-
शितुतद्विद्धियेनसर्वमिदंततं॥

विनाशमव्ययस्यास्यनकश्चित्कर्तुं
मर्हति ॥ १७ ॥ अंतवंतइमेदेहानित्यस्य
स्योक्ताःशरीरिणः ॥ अनाशिनोप्रमे-
यस्यतस्माद्युध्यस्वभारत ॥ १८ ॥ यए-
नंवेत्तिहंतारंयश्चैनंमन्यतेहतं ॥ उभौ

गी
२५

तौनविजानीतोनायंहंतिनहन्यते
नजायतेम्रियतेवाकदाचिन्नायंभू-
त्वाभवितावानभूयः॥अजोनित्यः
शाश्वतोयंपुराणोनहन्यतेहन्यमा
नेशरीरे॥२०॥वेदाविनाशिनंनित्यं

यपनसन्नमणयं ॥ कयंमणुकखःपा
थेकेचानयतिदंतिके ॥२॥ वामांसि
णीणिनियया विसायनवानिगरहा
तिनेपवाणि ॥ नियाप्रावेसणाणि विद
यनीणं अप्पणानिसंयातिनवानिदही ११

नैनंछिंदंतिशस्त्राणिनैनंदहतिपा-
वकः॥नचैनंक्लेदयंत्यापोनशोषय-
तिमारुतः॥२३॥अछेद्योयमदाह्योय-
मक्लेद्योशोष्यएवचः॥नित्यःसर्वग-
तःस्थाणुरचलोयंसनातनः॥२४॥

अव्यक्तोयमचिंत्योयमविकार्योय-
मुच्यते ॥ तस्मादेवं विदित्वैनं नानुशो-
चितुमर्हसि ॥२५॥ अथ चैनं नित्यजातं
नित्यं वा मन्यसे मृतं ॥ तथापि त्वं म-
हाबाहो नैनं शोचितुमर्हसि ॥२६॥ जा

तस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य
च॥ तस्मादपरिहार्येर्थे न त्वं शोचि-
तुमर्हसि॥२७॥ अव्यक्तादीनि भूता-
नि व्यक्तमध्यानि भारत॥ अव्यक्त-
निधनान्येव तत्र का परिदेवना॥२८॥

त्पश्यति कश्चिदेनं

आश्चर्यवत्पश्यति कश्चिदेनमाश्च
र्यवद्वदति तथैव चान्यः॥ आश्चर्यव
च्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद
न चैव कश्चित्॥२९॥ देही नित्यमवध्यो
ऽयं देहे सर्वस्य भारत॥ तस्मात्सर्वाणि

गी
१२

भूतानिनत्वंशोचितुमर्हसि॥ स्वधर्म
मपिचावेक्ष्यनविकंपितुमर्हसि॥३
धर्म्याद्धियुद्धाछ्रेयोन्यत्क्षत्रियस्यन
विद्यते॥३१॥ यदृच्छयाचोपपन्नंस्वर्ग
द्वारमपावृतं सुखिनःक्षत्रियाःपार्थ

लभंतेयुद्धमीदृशं॥ अथचेत्वमिमंध
र्म्यंसंग्रामंनकरिष्यसि॥ ततःस्वध
र्मंकीर्त्तिंचहित्वापापमवाप्स्यसि॥३३
अकीर्त्तिंचापिभूतानिकथयिष्यं
तितेव्ययां॥ संभावितस्यचाकीर्त्तिर्म

गी.
२८

रणादतिरिच्यते॥ भयाद्रणादुपरतं
मंस्यंते त्वां महारथाः॥ येषां च त्वं बहु
मतो भूत्वा यास्यसि लाघवं॥ अवाच्य
वादांश्च बहून्वदिष्यंति तवाहिता
:॥ निंदंतस्तव सामर्थ्यं ततो दुःख

तरंनुकिं॥हतोवाप्राप्स्यसिस्वर्गंजि
त्वावाभोक्ष्यसेमहीं॥तस्मादुत्तिष्ठकौं
तेययुद्धायकृतनिश्चयः॥सुखदुःखे
समेकृत्वालाभालाभौजयाजयौ॥त
तोयुद्धाययुज्यस्वनैवंपापमवाप्सं॰

गी
२९

सि ॥ एषांतेभिहितासांख्येबुद्धिर्योगे
त्विमांशृणु ॥ बुद्ध्यायुक्तोययापार्थक
र्मबंधंप्रहास्यसि ॥ नेहाभिक्रमना
शोस्तिप्रत्यवायोनविद्यते ॥ स्वल्पम
प्यस्यधर्मस्यत्रायतेमहतोभयात् ॥

अवसायात्मिकाबुद्धिरेकेहकुरुनं
दन॥ बहुशाखाह्यनंताश्चबुद्धयोव्य
वसायिनां॥ यामिमांपुष्पितांवाचं
प्रवदंत्यविपश्चितः॥ वेदवादरताः
पार्थनान्यदस्तीतिवादिनः॥ का

गी
३०

मात्मनः स्वर्गपरा जन्मकर्मफल-
प्रदां ॥ क्रियाविशेषबहुलां भोगैश्व
र्यगतिं प्रति ॥ भोगैश्वर्यप्रसक्तानां
तयापहृतचेतसां ॥ व्यवसाया-
त्मिका बुद्धिः समाधौ न विधीयते ॥

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभ-
वार्जुन ॥ निर्द्वंद्वोनित्यसत्वस्थोनिर्यो-
गक्षेमआत्मवान् ॥ यावानर्थउदपा-
नेसर्वतःसंप्लुतोदके ॥ तावान्सर्वे-
षुवेदेषुब्राह्मणस्यविजानतः ॥ क

र्मण्येवाधिकारस्ते मा फलेषु कदा
चन ॥ मा कर्मफलहेतुर्भूर्मा ते सं
गोऽस्त्वकर्मणि ॥ योगस्थः कुरु क
र्माणि संगं त्यक्त्वा धनंजय ॥ सिद्ध्यसि
द्ध्योः समो भूत्वा समत्वं योग उच्यते ॥

दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजय
बुद्धौशरणमन्विच्छकृपणाःफलहे
तवः॥बुद्धियुक्तोजहातीहउभेसुकृत
दुष्कृते॥तस्माद्योगाययुज्यस्वयोगः
कर्मसुकौशलं॥कर्मजंबुद्धियुक्ताः

गी
१२

हि फलं त्यक्त्वा मनीषिणः। जन्मबंध
विनिर्मुक्ताः पदं गछंत्यनामयं॥ य-
दा ते मोहकलिलं बुद्धिर्व्यतितरिष्य-
ति॥ तदा गंतासि निर्वेदं श्रोतव्य-
स्य श्रुतस्य च॥ श्रुतिविप्रतिपन्ना ते-

ॐ

यदा स्थास्यति निश्चला ॥ समाधाव-
चला बुद्धिस्तदा योगमवाप्स्यसि ॥ अ
वा उवा ॥ स्थितप्रज्ञस्य का भाषा समा-
धिस्थस्य केशव ॥ स्थितधीः किं प्रभाषे
त किमासीत व्रजेत किं । श्रीभगवानु-

गी.
२२

वाच॥ प्रजहाति यदा कामान्सर्वान्पा-
र्थ मनोगतान्॥ आत्मन्येवात्मना तुष्टः
स्थितप्रज्ञस्तदोच्यते॥ दुःखेष्वनुद्विग्न-
मनाः सुखेषु विगतस्पृहः॥ वीतरा-
गभयक्रोधः स्थितधीर्मुनिरुच्यते॥

यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभा
शुभं॥नाभिनंदतिनद्वेष्टितस्यप्रज्ञा
प्रतिष्ठिता॥५७॥यदासंहरतेचायंकू
र्मोंगानीवसर्वशः॥इंद्रियाणींद्रि
यार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता॥५८॥

गी
२४

विषयाविनिवर्त्तंतेनिराहारस्यदेहि
नः॥रसवर्ज्जंरसोप्यस्यपरंदृष्ट्वानिव
र्त्तते॥५९॥यततोह्यपिकौंतेयपुरु
षस्यविपश्चितः॥इंद्रियाणिप्रमा
थीनिहरंतिप्रसभंमनः॥६०॥

तानिसर्वाणिसंयम्ययुक्तआसीत-
मत्परः॥ वशेहियस्येंद्रियाणितस्य
प्रज्ञाप्रतिष्ठिता॥६१॥ ध्यायतोविषया
न्पुंसःसंगस्तेषूपजायते॥ संगात्सं-
जायतेकामःकामात्क्रोधोभिजायते- ६२

ते॥ क्रोधाद्भवति संमोहः संमोहात्स्मृ
तिविभ्रमः॥ स्मृतिभ्रंशाद्बुद्धिनाशो बु
द्धिनाशात्प्रणश्यति॥ रागद्वेषवियु-
क्तैस्तु विषयानिंद्रियैश्चरन्॥ आत्म-
वश्यैर्विधेयात्मा प्रसादमधिगच्छति

प्रसादेसर्वदुःखानांहानिरस्योपजा
यते॥प्रसंनचेतसोह्याशुबुद्धिःपर्यव
तिष्टते॥नास्तिबुद्धिरयुक्तस्यनचायु
क्तस्यभावना॥नचाभावयतःशां
तिरशांतस्यकुतःसुखं॥इंद्रियाणां

गी
३९
हिचरतांयन्मनोनुविधीयते॥तदस्य
हरतिप्रज्ञांवायुर्नावमिवांभसि॥त
स्माद्यस्यमहाबाहोनिगृहीतानिस
र्वशः॥इंद्रियाणींद्रियार्थेभ्यस्तस्य
प्रज्ञाप्रतिष्ठिता॥यानिशासर्वभू-

नांतस्यांजागर्ति संयमी ॥ यस्यांजा
ग्रति भूतानि सा निशा पश्यतो मुनेः
आपूर्यमाणमचलप्रतिष्ठं समुद्रमा
पः प्रविशंति यद्वत् ॥ तद्वत्कामा यं प्र
विशंति सर्वे स शांतिमाप्नोति न का-

मकामी॥ विहायकामान्यःसर्वान्
पुमांश्चरतिनिस्पृहः॥ निर्ममोनिरहं
कारःसशांतिमधिगच्छति॥ एषाब्रा
ह्मीस्थितिःपार्थनैनंप्राप्यविमुह्यति॥
स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृ

च्छति ॥ ७२ ॥ इति श्रीभगवद्गीतासूपनि
षत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृ
ष्णार्जुनसंवादे सांख्ययोगोनामद्विती
योध्यायः ॥ २ ॥ अर्जुन उवाच ॥ ज्यायसी
चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ॥ त

गी
१९

किंकर्मणिघोरेमांनियोजयसिके
शव॥व्यामिश्रेणेववाक्येनबुद्धिंमो
हयसीवमे॥तदेकंवदनिश्चित्यये
नश्रेयोहमाप्नुयां॥श्रीभगवानुवाच॥
लोकेस्मिंद्विविधानिष्ठापुराप्रोक्ता

मयानघ ॥ ज्ञानयोगेन सांख्यानां क-
र्मयोगेन योगिनां ॥ न कर्मणामनार-
म्भान्नैष्कर्म्यं पुरुषोऽश्नुते ॥ न च संन्यस-
नादेव सिद्धिं समधिगच्छति ॥ न हि क-
श्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्

गी
१९

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजै
र्गुणैः ॥ कर्मेंद्रियाणि संयम्य य आ
स्ते मनसा स्मरन् ॥ इंद्रियार्थान्विमूढा
त्मा मिथ्याचारः स उच्यते ॥ यस्त्विंद्रिया
णि मनसा नियम्यारभतेर्ज्जुन ॥ ६

कर्मेंद्रियैःकर्मयोगमसक्तःसवि-
शिष्यते॥नियतंकुरुकर्मत्वंकर्मज्या
योह्यकर्मणः॥शरीरयात्रापिचतेन-
प्रसिद्ध्येदकर्मणः॥८॥यज्ञार्थात्क-
र्मणोन्यत्रलोकोयंकर्मबंधनः॥त

गी
३.
मे

तदर्थंकर्मकौंतेयमुक्तसंगःसमा
चर॥९॥सहयज्ञाःप्रजाःसृष्ट्वापुरोवाच
प्रजापतिः।अनेनप्रसविष्यध्वमेष
वोस्त्विष्टकामधुक॥१०॥देवान्भाव
यतानेनतेदेवाभावयंतुवः॥ ॥

परस्परंभावयंतःश्रेयःपरमवाप्स्य
थ॥११॥इष्टान्भोगान्हिवोदेवादास्यंते
यज्ञभाविताः॥तैर्दत्तानप्रदायैभ्यो
योभुंक्तेस्तेनएवसः॥१२॥यज्ञशिष्टा
शिनःसंतोमुच्यंतेसर्वकिल्बिषैः॥

गी
५

भुंजंते ते त्वघं पापा ये पचंत्यात्मका
रणात् ॥ अन्नाद्भवंति भूतानि पर्जन्या
दन्नसंभवः ॥ यज्ञाद्भवति पर्जन्यो
यज्ञः कर्मसमुद्भवः ॥१४॥ कर्म ब्र
ह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं ॥

तस्मात्सर्वगतंब्रह्मनित्यंयज्ञेप्रति
ष्ठितं॥एवंप्रवर्तितंचक्रंनानुवर्तय-
तीहयः॥अघायुरिंद्रियारामोमो-
घंपार्थसजीवति॥१६॥यस्त्वात्मर
तिरेवस्यादात्मतृप्तश्चमानवः॥आ

गी ४२

त्मन्येववसंतुष्टस्तस्यकार्यंनविद्य
ते॥१७॥नैवतस्यकृतेनार्थोनाकृते-
नेहकश्चन॥नचास्यसर्वभूतेषुक
श्चिदर्थव्यपाश्रयः॥१८॥तस्माद-
सक्तःसततंकार्यंकर्मसमाचर

असक्तोह्याचरन्कर्मपरमाप्नोतिपू
रुषः ॥९॥ कर्मणैवहिसंसिद्धिमा
स्थिताजनकादयः ॥ लोकसंग्रहमे
वापिसंपश्यन्कर्तुमर्हसि ॥०॥ यद्यदा
चरतिश्रेष्ठस्तत्तदेवेतरोजनः ॥ सयत्

गी
५१

त्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते॥
नमेपार्थास्तिकर्त्तव्यंत्रिषुलोकेषु
किंचन॥नानवाप्तमवाप्तव्यंवर्त्तए
वचकर्मणि॥यदिह्यहंनवर्त्तेयंजातु
कर्मण्यतंद्रितः॥ममवर्त्मानुवर्त्तते

मनुष्याःपार्थसर्वशः॥उत्सीदेयुरिमे
लोकानकुर्यांकर्मचेदहं॥संकरस्य
चकर्तास्यामुपहन्यामिमाःप्रजाः॥
सक्ताःकर्मण्यविद्वांसोयथाकुर्वंति
भारत॥कुर्याद्विद्वांस्तथासक्तश्चिकी

र्षुर्लोकसंग्रहं॥ नबुद्धिभेदंजनयेदज्ञ-
नांकर्मसंगिनां॥ जोषयेत्सर्वक-
र्माणिविद्वान्युक्तःसमाचरन्॥ प्रकृ-
तेःक्रियमाणानिगुणैःकर्माणिसर्व-
शः॥ अहंकारविमूढात्माकर्ताहमि

तिमन्यते ॥ तत्ववितु महाबाहो गुण
कर्मविभागयोः ॥ गुणागुणेषुवर्तं-
तइतिमत्वानसज्जते ॥ प्रकृतेर्गुणसं
मूढाःसज्जंतेगुणकर्मसु ॥ तानकृ-
त्स्नविदोमंदान्कृत्स्नविन्नविचालये

गी
४२

नु॥मयिसर्वाणिकर्माणिसंन्यस्या
ध्यात्मचेतसा॥निराशीर्निर्ममोभू
त्वायुध्यस्वविगतज्वरः॥३०॥येमेमत
मिदंनित्यमनुतिष्ठंतिमानवाः॥श्र
द्धावंतोनसूयंतोमुच्यंतेतेपिकर्म

भिः॥ ये त्वेतदभ्यसूयंतो नानुतिष्ठं-
ति मे मतं॥ सर्वज्ञानविमूढांस्तान्वि-
द्धि नष्टानचेतसः॥ सदृशं चेष्टते स्व-
स्याः प्रकृतेर्ज्ञानवानपि॥ प्रकृतिं या-
न्ति भूतानि निग्रहः किं करिष्यति॥

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थि
तौ ॥ तयोर्न वशमागच्छेत्तौ ह्यस्य परि
पंथिनौ ॥ ३४ ॥ श्रेयान्स्वधर्मो विगु
णः परधर्मात्स्वनुष्ठितात् ॥ स्वधर्मे
निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

अर्जुनुवाच ॥ अथ केन प्रयुक्तोयं पा-
पं चरति पूरुषः ॥ अनिच्छन्नपि वार्ष्णे-
य बलादिव नियोजितः ॥ श्रीभगवा-
नुवाच ॥ काम एष क्रोध एष रजोगु-
ण समुद्भवः ॥ महाशनो महापाप्मा

गी ५०

विद्ध्येनमिह वैरिणं॥ धूमेनाव्रियते व-
ह्निर्यथादर्शो मलेन च॥ यथोल्बेनावृ-
तो गर्भस्तथा तेनेदमावृतं॥ आवृतं-
ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा॥
कामरूपेण कौंतेय दुःपूरेणान-

नलेनच ॥ इंद्रियाणिमनोबुद्धिरस्या
धिष्टानमुच्यते ॥ एतैर्विमोहयत्येष
ज्ञानमावृत्यदेहिनं ॥ तस्मात्वमिंद्रि
याण्यादौनियम्यभरतर्षभ ॥ पाप्मा
नंप्रजहिह्येनंज्ञानविज्ञाननाशनं ॥

इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरं
मनः॥मनसस्तुपराबुद्धिर्योबुद्धेःप
रतस्तुसः॥४२॥एवंबुद्धेःपरंबुद्ध्वासं
स्तभ्यात्मानमात्मना॥जहिशत्रुं
महाबाहोकामरूपंदुरासदं॥४३॥

इतिश्रीभगवद्गीतासूपनिषत्सु
ब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुन
संवादेकर्मयोगोनामतृतीयोध्या
यः॥३॥श्रीभगवानुवाच॥इमंविव
स्वतेयोगंप्रोक्तवानहमव्ययं॥वि

गी ४९

वस्वान्मनवेप्राहमनुरिक्ष्वाकवेब्र-
वीत्‌॥१॥ एवंपरंपराप्राप्तमिमंराज
र्षयोविदुः॥ सकालेनेहमहतायो
गोनष्टःपरंतप॥ २॥ सएवायं
मयातेद्ययोगःप्रोक्तःपुरातनः॥

उ

३ भक्तोसिमेसखाचेतिरहस्यंह्येतदुं
त्तमं॥ अर्जुन उवाच॥ अपरंभवतोजन्म
परंजन्मविवस्वतः॥ कथमेतद्विजा
नीयांत्वमादौप्रोक्तवानिति॥ श्रीभ
गवानुवाच॥ बहून्यमेव्यतीतानिज

गी. ५.

जन्मानि तव चार्जुन ॥ तान्यहं वेद स-
र्वाणि न त्वं वेत्थ परंतप ॥ अजोपि सन्न
व्ययात्मा भूतानामीश्वरोपि सन् ॥ प्र
कृतिं स्वामधिष्ठाय संभवाम्यात्ममा
यया ॥ यदा यदा हि धर्मस्य ग्लानिर्भ-

वति भारत ॥ अभ्युत्थानमधर्मस्य त
दात्मानं सृजाम्यहं ॥ परित्राणाय सा
धूनां विनाशाय च दुष्कृतां ॥ धर्मसंस्था
पनार्थाय संभवामि युगे युगे ॥ जन्म
कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ॥

त्यक्त्वादेहंपुनर्जन्मनैतिमामेतिसो
र्जुन॥ वीतरागभयक्रोधामन्मया॰
मामुपाश्रिताः॥ बहवोज्ञानतपसा
पूतामद्भावमागताः॥ येयथामां
प्रपद्यंतेतांस्तथैवभजाम्यहम्॥

ममवर्मोनुवर्तंतेमनुष्याःपार्थस-
र्वशः।कांक्षंतःकर्मणांसिद्धिंयजं-
तइहदेवता॥क्षिप्रंहिमानुषेलोके-
सिद्धिर्भवतिकर्मजा॥चातुर्वर्ण्यं-
मयासृष्टंगुणाकर्मविभागशः॥त

गी
५५

स्यकर्तारमपिमांविद्ध्यकर्तारम-
व्ययं॥नमांकर्माणिलिंपंतिनमेक
र्मफलेस्पृहा॥इतिमांयोभिजाना
तिकर्मभिर्नसबध्यते॥१४॥एवंज्ञा-
त्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिः॥

ऊतकंसेवंतनमालेवंएवंपर्वंतरेकं
ते॥४॥किमकंकिमकंसेनिकं
वयेयत्रमेहिताः॥तेनेकंमेउवसा
मियताबामोस्सेमुमात॥११॥कर्म
गोतामिबाहवंबोहव्यंबविकर्मणाः

अकर्मणश्चबोद्धव्यंगहनाकर्मणो
गतिः॥१७॥कर्मण्यकर्मयःपश्येद
कर्मणिचकर्मयः॥सबुद्धिमान्मनु
ष्येषुसयुक्तःकृत्स्नकर्मकृत्॥यस्यस
र्वेसमारंभाःकामसंकल्पवर्जिताः॥

ज्ञानाग्निदग्धकर्माणंतमाहुःपंडितं
बुधाः॥त्यक्त्वाकर्मफलासंगंनित्यतृ
प्तोनिराश्रयः॥कर्मण्यभिप्रवृत्तोपि
नैवकिंचित्करोतिसः॥२०॥निराशी
र्यतचित्तात्मात्यक्तसर्वपरिग्रहः।शा

गी
१४

रीरं केवलं कर्म कुर्वंनाप्नोति किल्बि
षं ॥२०॥ यदृच्छालाभसंतुष्टो द्वंद्वातीतो
विमत्सरः ॥ समः सिद्धावसिद्धौ च कृ
त्वापि न निबध्यते ॥ २१॥ गतसंग्
स्य मुक्तस्य ज्ञानावस्थितचेतसः ॥

यज्ञायाचरतःकर्मसमग्रंप्रविलीय
ते॥२३॥ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौ
ब्रह्मणाहुतं॥ब्रह्मैवतेनगंतव्यंब्रह्म
कर्मसमाधिना॥२४॥दैवमेवापरेय
ज्ञंयोगिनःपर्युपासते॥ब्रह्माग्नावप

रैयत्नं यत्नैर्नैवोपलक्ष्यत इति॥ श्रोत्रादीं-
नींद्रियाण्यन्ये संयमाग्निषु जुह्वति
शब्दादीन्विषयानन्य इंद्रियाग्निषु जु-
ह्वति॥ सर्वाणींद्रियकर्माणि प्राणा-
कर्माणि चापरे॥ आत्मसंयमयोगा-

मेज्जकुलिताणदीविने ॥ दक्खयताण
पोयताणयोगायताणत्थापये ॥ ताण्णा
यताणयताखवयणयः सखिताणवणाः
यपाणेत्तकुलिशाणाशाणोपाणेणया·
पये ॥ शाणाणपाणयाणीकडाशाणाणया·

गी
५८

मपरायणाः॥ अपरेनियताहाराः प्रा॰
णांप्राणेषुजुह्वति॥ सर्वेप्येतेयज्ञवि
दोयज्ञक्षपितकल्मषाः॥३०॥ यज्ञशि
ष्टामृतभुजोयांतिब्रह्मसनातनं॥ ना
यंलोकोस्त्ययज्ञस्य कुतोन्यःकुरुस॰

नमः॥ एवंबहुविधायज्ञाविततात्रल
णोमुखे॥ कर्मजान्विद्धितान्सर्वाने·
वंज्ञात्वाविमोक्षसे॥ श्रेयांद्रव्यमयाद्य
ज्ञाज्ज्ञानयज्ञःपरंतप॥ सर्वंकर्माखि·
लंपार्थेज्ञानेपरिसमाप्यते॥ ३३॥ तद्वि·

गी
५०

द्धिप्रणिपातेनपरिप्रश्नेनसेवया ॥ उ
पदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्वदर्शि
नः ॥ ३४ ॥ यज्ज्ञात्वानपुनर्मोहमेवं
यास्यसिपांडवः ॥ येनभूतान्यशे
षेणाद्रक्ष्यस्यात्मन्यथोमयि ॥ ३५ ॥

अपिचेदसिपापेभ्यःसर्वेभ्यःपाप
कृत्तमः॥सर्वंज्ञानप्लवेनैववृजिनंसं
तरिष्यसि॥३८॥यथैधांसिसमिद्धोऽ
ग्निर्भस्मसात्कुरुतेर्जुन॥ज्ञानाग्निः
सर्वकर्माणिभस्मसात्कुरुतेतथा॥३

गी
५९

नहिज्ञानेनसदृशंपवित्रमिहविद्य
ते॥तत्स्वयंयोगसंसिद्धःकालेना-
त्मनिविंदति॥३८॥श्रद्धावांलभतेज्ञा
नंतत्परःसंयतेंद्रियः॥ज्ञानंलब्ध्वा-
परांशांतिमचिरेणाधिगच्छति॥३९॥

अज्ञश्चाश्रद्दधानश्च संशयात्मा वि-
नश्यति ॥ नायं लोकोस्ति न परो न सु-
खं संशयात्मनः ॥ योगसंन्यस्तकर्मा-
णं ज्ञानसंछिंनसंशयः ॥ आत्मवंतं
न कर्माणि निबध्नंति धनंजयः ॥ त-

गी.
५२

स्माज्ञानसंभूतंहृत्स्थंज्ञानासिना
त्मनः॥छित्वैनंसंशयंयोगमाति
ष्ठोत्तिष्ठभारत॥४२॥इतिश्रीभगव
द्गीतासूपनिषत्सुब्रह्मविद्यायांयोग
शास्त्रेश्रीकृष्णार्जुनसंवादेच

कर्मसंन्यासयोगोनामचतुर्थोध्या
यः ॥४॥ अर्जुनउवाच ॥ संन्यासंकर्मणां
कृष्णपुनर्योगंचशंससि ॥ यच्छ्रेयए
तयोरेकंतन्मेब्रूहिसुनिश्चितं ॥ ॥ श्री
भगवानुवाच ॥ संन्यासःकर्मयोगाश

गी
५०

श्च निःश्रेयसकरावुभौ ॥ तयोस्तु कर्म
संन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥ ज्ञे
यः स नित्यसंन्यासी यो न द्वेष्टि न कांक्ष
ति ॥ निर्द्वंद्वो हि महाबाहो सुखं बंधा
त्प्रमुच्यते ॥ ३ ॥ सांख्ययोगौ पृथग्बालाः

प्रवदंतिनपंडिताः॥एकमप्यास्थि
तःसम्यगुभयोर्विंदतेफलं॥४॥य
त्सांख्यैःप्राप्यतेस्थानंतद्योगैरपिगम्
यते॥एकंसांख्यंचयोगंचयःपश्य
तिसपश्यति॥५॥संन्यासस्तुमहाबाहो

गी
२८

डुःखमाप्नुमयोगतः ॥ योगयुक्तो मु-
निर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥ योग
युक्तो विशुद्धात्मा विजितात्मा जितेन्द्रि-
यः ॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि-
न लिप्यते ॥ ७ ॥ नैव किंचित्करोमीति-

छक्कोसमेयतत्तवविन॥ पछपनस्पाग

स्सघातनिखबम्भनाछल्लवपनछम

न॥ पुलपविसनत्यहत्वमिषवि-

मिछत्रपि॥ इंद्रियाणींइंद्रियार्थेछव-

नेनरतितियारयन॥ खलगापायायक

गी
६१

णिसंगंत्यक्त्वाकरोतियः॥लिप्य-
तेनसपापेनपद्मपत्रमिवांभसा।का-
येनमनसाबुद्ध्याकेवलैरिंद्रियैरपि-
॥१०॥योगिनःकर्मकुर्वंतिसंगंत्य-
क्त्वात्मशुद्धये॥११॥युक्तःकर्मफ

फलंत्यक्त्वाशांतिमाप्नोतिनैष्ठिकीं
अयुक्तःकामकारेणफलेसक्तो
निबध्यते॥१२॥सर्वकर्माणिमनसा
संन्यस्यास्तेसुखंवशी॥नवद्वारेपु
रेदेहीनैवकुर्वन्नकारयन्॥१३॥नक

र्त्वंनकर्म्माणिलोकस्यसृजतिप्र-
भुः॥नकर्म्मफलसंयोगंस्वभावस्
स्तुप्रवर्त्तते॥१४॥नादत्तेकस्यचित्पा
पंनचैवसुकृतंविभुः॥अज्ञानेना-
वृतंज्ञानंतेनमुह्यंतिजंतवः॥१५॥

ज्ञानेन तु तदज्ञानं येषां नाशितमा-
त्मनः ॥ तेषामादित्यवज्ज्ञानं प्रकाश-
यति तत्परं ॥१६॥ तद्बुद्धयस्तदात्मान-
स्तन्निष्ठास्तत्परायणाः ॥ गच्छंत्यपु-
नरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥

गी
२४

विद्याविनयसंपन्नेब्राह्मणेगविह-
स्तिनि ॥ शुनिचैवश्वपाकेचपंडिता
ःसमदर्शिनः ॥ १८ ॥ इहैवतैर्जितःस-
र्गोयेषांसाम्येस्थितंमनः ॥ निर्दोषं-
हिसमंब्रह्मतस्माद्ब्रह्मणितेस्थिताः ॥ १९

नक्खत्तेसियंचाम्मेनोहिंजेत्ताप्पर
चारए ॥ सियखुहिंसमेठोवत्तवि-
ज्ञालणा सियत: ॥२०॥ बालस्सपेछस-
कामाविंदम्मामनियत्तए ॥ सव्वं-
लयोगाएकामामसाविमतयमक्कने ॥

गी
८५

येहिसंस्पर्शजाभोगादुःखयोनयए
वते॥ आद्यंतवंतःकौंतेयनतेषुरम
तेबुधः॥२२॥ शक्नोतीहैवयःसोढुंप्रा
क्शरीरविमोक्षणात्॥ कामक्रोधो
द्भवंवेगंसयुक्तःससुखीनरः॥ २३॥

योंतःसुखोंतरारामस्तथांतर्ज्योतिरे
वयः॥सयोगीब्रह्मनिर्वाणंब्रह्मभूतो
धिगच्छति॥२४॥लभंतेब्रह्मनिर्वाणम
ऋषयःक्षीणकल्मषाः॥छिन्नद्वैधायत
तात्मानःसर्वभूतहितेरताः॥२५॥का·

मक्रोधवियुक्तानां यतीनां यतचेत-
सां ॥ अभितो ब्रह्मनिर्वाणं वर्त्तते वि-
दितात्मनां ॥ २८ ॥ स्पर्शान्कृत्वा बहिर्बा-
ह्यांश्चक्षुश्चैवांतरे भ्रुवोः ॥ प्राणापा-
नौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥ २

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपराय-
णः ॥ विगतेछाभयक्रोधोयःसदा-
मुक्तएवसः ॥ २८ ॥ भोक्तारंयज्ञतपसां
सर्वलोकमहेश्वरं ॥ सुहृदंसर्वभूता
नांज्ञात्वामांशांतिमृछति ॥ २९ ॥ इति-

गी
९८

श्रीभगवद्गीतासूपनिषत्सुब्रह्मवि
द्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवा-
देसंन्यासयोगोनामपंचमोध्याय
ः॥५॥ श्रीभगवानुवाच॥ अनाश्रितः
कर्मफलंकार्यंकर्मकरोतियः

स संन्यासी च योगी च न निरग्निर्न चा
क्रियः ॥१॥ यं संन्यासमिति प्राहुर्योगं
तं विद्धि पांडवः ॥ न ह्यसंन्यस्तसंक
ल्पो योगी भवति कश्चन ॥२॥ आरुरु
क्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥

गी
९८

योगारूढस्य तस्यैव शमः कारणमु
च्यते ॥ यदा हि नेन्द्रियार्थेषु न कर्मस्व-
नुषज्जते ॥ सर्वसंकल्पसंन्यासी
योगारूढस्तदोच्यते ॥४॥ उद्धरेदा-
त्मनात्मानं नात्मानमवसादयेत् ॥

दात्मैवह्यात्मनोबंधुरात्मैवरिपुरा-
त्मनः॥५॥बंधुरात्मात्मनस्तस्ययेना-
त्मैवात्मनाजितः॥अनात्मनस्तुशत्रु
त्वेवर्त्तेतात्मैवशत्रुवत्॥६॥जितात्मन
प्रशांतस्यपरमात्मासमाहितः॥शी

गी
९९

तोष्णसुखदुःखेषु तथा मानापमा
नयोः ॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थ
स्थो विजितेंद्रियः ॥ युक्त इत्युच्यते यो-
गी समलोष्टाश्मकांचनः ॥ ८ ॥ सुहृन्
मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु ॥

साधुष्वपिचपापेषुसमबुद्धिर्विशि-
ष्यते॥योगीयुंजीतसततमात्मानंरह-
सिस्थितः॥एकाकीयतचित्तात्मानि-
राशीरपरिग्रहः॥शुचौदेशेप्रतिष्ठाप्य
स्थिरमासनमात्मनः॥नात्युछ्रितंनाति

गी
८

नीचंचैलाजिनकुशोत्तरं॥११॥तत्रैका-
ग्रंमनःकृत्वायतचित्तेंद्रियक्रियः॥
उपविश्यासनेयुंज्याद्योगमात्मवि-
शुद्धये॥समंकायशिरोग्रीवंधारयं-
नचलंस्थिरः॥संप्रेक्ष्यनासिकाग्रंस्वं-

दिशश्चानवलोकयन् ॥१३॥ प्रशान्तात्मा
विगतभीर्ब्रह्मचारिव्रते स्थितः ॥ मनः
संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४
युंजन्नेवं सदात्मानं योगी नियतमा-
नसः ॥ शांतिं निर्वाणपरमां मत्संस्था

गी
७१

मधिगछति ॥ नात्यश्नतस्तुयोगोस्ति
नचैकांतमनश्नतः ॥ नचातिस्वप्नशी
लस्यजाग्रतोनैवचार्जुन ॥ १६ ॥ युक्ताहा
रविहारस्ययुक्तचेष्टस्यकर्मसु ॥ यु·
क्तस्वप्नावबोधस्ययोगोभवतिदुः ॥

खहा॥१७॥यदाविनियतंचित्तमात्मन्ये
वावतिष्टते॥निस्पृहःसर्वकामेभ्यो·
युक्तइत्युच्यतेतदा॥१८॥यथादीपोनि
वातस्थोनेंगतेसोपमास्मृता॥योगि
नोयतचित्तस्ययुंजतोयोगमात्मनः॥१९

यत्रोपरमतेचित्तंनिरुद्धंयोगसेवया
यत्रचैवात्मनात्मानंपश्यन्नात्मनि-
तुष्यति ॥२०॥ सुखमात्यंतिकंयत्त
द्बुद्धिग्राह्यमतींद्रियं॥ वेत्तियत्रन
चैवायंस्थितश्चलतितत्वतः॥२१॥

यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंत
तः॥यस्मिंस्थितोनदुःखेनगुरुणापि
विचाल्यते॥२२॥तंविद्याद्दुःखसंयोग·
वियोगंयोगसंज्ञितं॥सनिश्चयेनयो
क्तव्योयोगोनिर्विण्णचेतसा॥२३॥संक

गी
७२

ल्पप्रभवान्कामांस्त्यक्त्वासर्वानशे-
षतः॥मनसैवेंद्रियग्रामंविनियम्य
समंततः॥२४॥शनैःशनैरुपरमे-
द्बुद्ध्याधृतिगृहीतया॥आत्मसंस्थं
मनःकृत्वानकिंचिदपिचिंतयेत्॥२५

यतोयतोनिश्चरतिमनश्चंचलमस्थि
रं॥ततस्ततोनियम्यैतदात्मन्येववशं
नयेत्॥२६॥प्रशांतमनसंह्येनंयोग
िनंसुखमुत्तमं॥उपैतिशांतरजसं
ब्रह्मभूतमकल्मषं॥२७॥युंजन्नेवंसदा

गी
७४

त्मानं योगी विगतकल्मषः ॥ सुखेन
ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ॥२८
सर्वभूतस्थमात्मानं सर्वभूतानि चा
त्मनि ॥ ईक्षते योगयुक्तात्मा सर्वत्र स
मदर्शनः ॥२९॥ यो मां पश्यति सर्वत्र स

सर्वं च मयि पश्यति ॥ तस्याहं न प्रण
श्यामि स च मे न प्रणश्यति ॥३०॥ सर्व
भूतस्थितं यो मां भजत्येकत्वमास्थितः
सर्वथा वर्तमानोपि स योगी मयि व-
र्त्तते ॥३१॥ आत्मौपम्येन सर्वत्र समं पश्य-

गी
७८

श्यतियोऽर्जुन॥ सुखंवायदिवादुःखंस
योगीपरमोमतः॥३२॥ अर्जुनउवाच॥ यो
यंयोगस्त्वयाप्रोक्तः साम्येनमधुसूद
नः॥ एतस्याहंनपश्यामिचंचलत्वा
त्स्थितिंस्थिरां॥ चंचलंहिमनःकृष्णप्र

माथिबलवदृढं॥ तस्याहंनिग्रहंमन्ये
वायोरिवसुदुष्करं॥३४॥ श्रीभगवानु
वाच॥ असंशयंमहाबाहोमनोदुर्नि
ग्रहंचलं॥ अभ्यासेनतुकौंतेयवैरा
ग्येणचगृह्यते॥ असंयतात्मनायोगो

गी
१९

ऽःप्रापइतिमेमतिः ॥ वश्यात्मनातुय
तताशक्योवाप्तुमुपायतः ॥ अर्जुनउवा
च। अयतिश्रद्धयोपेतोयोगाच्चलि
तमानसः ॥ अप्राप्ययोगसंसिद्धिं
कांगतिंकृष्णगच्छति। कच्चिन्नोभय

विभ्रष्टश्छिंनाभ्रमिवनश्यति॥अप्रति
ष्ठोमहाबाहोविमूढोब्रह्मणःपथि॥ १९
एतंमेसंशयंकृष्णछेत्तुमर्हस्यशेष-
तः॥त्वदन्यःसंशयस्यास्यछेत्तानह्यु
पपद्यते॥३९॥श्रीभगवानुवाच॥पा-

मी
११

थैनैवेद्दनामलब्धविनाशालस्यविघ-
नै॥ नोहेकल्याणककामिङ्वांतिं-
तानतयोऊति॥ ५॥ श्राध्यपुण्यकृतोर-
लोकान्तिकात्राप्तश्लोसमाः॥ सुर्वानो
श्रीमतोयादेयोगाभिश्लोभिजायते॥

अथवायोगिनामेवकुलेभवतिधी
मतां॥एतद्धिदुर्लभतरंलोकेजन्मय
दीदृशं॥४२॥तत्रतंबुद्धिसंयोगंलभ
तेपौर्वदेहिकं॥यततेचततोभूयःसं
सिद्धौकुरुनंदनः॥४३॥पूर्वाभ्यासेन

गी.
१८

तेनैवह्रियतेह्यवशोपिसः॥जिज्ञासुर
पियोगस्यशब्दब्रह्मातिवर्तते॥प्रय
त्नाद्यतमानस्तुयोगीसंशुद्धकिल्बि
षः॥अनेकजन्मसंसिद्धस्ततोयाति
परांगतिं॥४५॥तपस्विभ्योधिकोयोगी

ज्ञानीभ्योपिमतोधिकः॥कर्मिभ्यश्चा
धिकोयोगीतस्माद्योगीभवार्जुन।यो
गिनामपिसर्वेषांमद्गतेनांतरात्मना
श्रद्धावान्भजतेयोमांसमेयुक्ततमो
मतः॥४७॥इतिश्रीभगवद्गीतासूप

गी
८१

निषत्सुब्रह्मविद्यायांयोगशास्त्रेश्री
कृष्णार्जुनसंवादेआत्मसंयमयोगोना
मषष्ठोध्यायः।६।श्रीभगवानुवाच।मय्या
सक्तमनाःपार्थयोगंयुंजन्मदाश्रयः॥
असंशयंसमग्रंमांयथाज्ञास्यसि

नक्षत्रा ॥ तातेनेदं सवितानमितदेवर
सायमपोषत: ॥ यत्तात्वातेनेदमपेयोन्य
त्तातनयमनवमिषिक्ते ॥ १ ॥ मनुष्याणां
सदसेभुकाम्बियनतीसिद्धेय ॥ यन
नामपिसिद्धानोकांक्षिणौवेतिनतन ११

गी
९०

भूमिरापोनलोवायुःखंमनोबुद्धिरे
वच॥ अहंकारइतीयंमेभिन्नाप्रकृ
तिरष्टधा॥४॥ अपरेयमितस्त्वन्यां
प्रकृतिंविद्धिमेपरां॥जीवभूतां
महाबाहोययेदंधार्यतेजगत्॥५॥

पतयोनीतिभूतानिसर्वाणिसुपथा
र्थ ॥ अर्हंक्रन्त्वस्मजवातःशुभवःपुः
लयत्वया ॥८॥ मनःपवनंनाथकि
विटास्तियनेनयः ॥ मयिसर्वेभिदंषो
नत्वेमणिगणगणइव ॥९॥ रसोदमपः

गी
८

कौंतेयप्रभास्मिशशिसूर्ययोः॥प्रण-
वःसर्ववेदेषुशब्दःखेपौरुषंनृषु॥८॥
पुण्योगंधःपृथिव्यांचतेजश्चास्मिविभा
वसौ॥जीवनंसर्वभूतेषुतपश्चा-
स्मितपस्विषु॥बीजंमांसर्वभूतानां-

विद्धि पार्थ सनातनं ॥ बुद्धिर्बुद्धिमता-
मस्मि तेजस्तेजस्विनामहं ॥ १० ॥ बलं ब-
लवतां चाहं कामरागविवर्जितं ॥ ध-
र्माविरुद्धो भूतेषु कामोस्मि भरतर्ष-
भ ॥ ये चैव सात्विका भावा राजसास्ता-

गी मसाश्चये॥ मत्तएवेतितांविद्धिनत्वहं-
९२ नेषुतेमयि॥ त्रिभिर्गुणमयैर्भावैरेभि
सर्वमिदंजगत्॥ मोहितंनाभिजाना-
तिमामेभ्यःपरमव्ययं ॥१३॥ दैवीह्ये-
षागुणमयीममामायादुरत्यया॥

मामेवयेप्रपद्यंतेमायामेतांतरंति-
ते॥४॥नमांदुष्कृतिनोमूढाःप्रपद्यंते
नराधमाः॥माययापहृतज्ञानाआ-
सुरंभावमाश्रिताः॥५॥चतुर्विधाभ
जंतेमांजनाःसुकृतिनोर्जुनः॥आर्त

गी
८१

र्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्ष-
भ॥ तेषांज्ञानीनित्ययुक्तएकभक्ति-
र्विशिष्यते॥ प्रियोहिज्ञानिनोत्यर्थ-
महंसचममप्रियः॥१७॥ उदाराः
सर्वएवैतेज्ञानीत्वात्मैवमेमतं॥१

आस्थितःसहियुक्तात्मामामेवानुत्त
मांगतिं॥बहूनांजन्मनामंतेज्ञानवा-
न्मांप्रपद्यते॥वासुदेवःसर्वमितिस-
महात्मासुदुर्लभः॥१९॥कामैस्तैस्तै
र्हृतज्ञानाःप्रपद्यंतेन्यदेवताः॥तंतं

गी
८४

नियममास्थाय प्रकृत्या नियताः स्वया
यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमि
च्छति॥ तस्य तस्याचलां श्रद्धां तामेव
विदधाम्यहं॥२१॥ स तया श्रद्धया यु
क्तस्तस्याराधनमीहते॥ लभते च

ततःकामान्मयैवविहितान्हितान्॥ २२

अंतवत्तुफलंतेषांतद्भवत्यल्पमेधा-

सां॥देवान्देवयजोयांतिमद्भक्तायां-

तिमामपि॥२३॥अव्यक्तंव्यक्तिमापन्नं

मन्यंतेमामबुद्धयः॥परंभावमजा-

गी
८५

नंतो ममाव्ययमनुत्तमं॥२४॥नाहंप्र
काशः सर्वस्य योगमायासमावृतः
मूढोयंनाभिजानातिलोकोमामज
मव्ययं॥वेदाहंसमतीतानिवर्तमा
नानिचार्जुन॥भविष्याणिचभूतानि

मांतुवेदनकश्चन॥२६॥इछाद्वेषसमु

त्थेनद्वंद्वमोहेनभारत॥सर्वभूता

निसंमोहंसर्गेयांतिपरंतप॥२७॥येषां

त्वंतगतंपापंजनानांपुण्यकर्मणां॥

तेद्वंद्वमोहनिर्मुक्ताभजंतेमांदृढव्रताः

गी ८९

जरामरणमोक्षाय मामाश्रित्य यतं
ति ये ॥ ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं
कर्म चाखिलं ॥ २९ ॥ साधिभूताधिदै-
वं मां साधियज्ञं च ये विदुः । प्रयाण-
कालेपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥

इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्म
विद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादे
ज्ञानविज्ञानयोगोनामसप्तमोध्या-
यः ॥७॥ अर्जुनउवाच ॥ किंतद्ब्रह्मकिमध्या
त्मंकिंकर्मपुरुषोत्तम ॥ अधिभूतंच-

गी
८

किंप्रोक्तमधिदैवं किमुच्यते ॥१॥ अधि
यज्ञः कथं कोत्र देहेस्मिन्मधुसूदन ॥
प्रयाणकाले च कथं ज्ञेयोसि निय
तात्मभिः श्रीभगवानुवाच ॥ अक्षरं
ब्रह्म परमं स्वभावोध्यात्ममुच्यते ॥

भूतभावोद्भवकरोविसर्गःकर्मसं
ज्ञितः॥अधिभूतंक्षरोभावःपुरुष
श्चाधिदैवतं॥अधियज्ञोहमेवात्रदेहेदे
हभृतांवरः॥ ४ ॥अंतकालेचमा
मेवस्मरन्मुक्त्वाकलेवरं॥यःप्रया

अ

गी
९८

तिसमद्भावंयातिनास्त्यत्रसंशा
य: ॥ यंयंवापिस्मरन्भावंत्यजत्यंते
कलेवरं ॥ तंतमेवैतिकौंतेयसदा
तद्भावभावित: ॥८॥ तस्मात्सर्वे
षुकालेषुमामनुस्मरयुध्यच ॥ म

मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसं-
शयः ॥७॥ अभ्यासयोगयुक्तेनचेत
सानान्यगामिना ॥ परमंपुरुषंदिव्यं
यातिपार्थानुचिंतयन् ॥८॥ कविंपुरा
णमनुशासितारमणोरणीयांसम-

गी
८२

नुस्मरेद्यः॥सर्वस्यधातारमचिंत्यरू
पमादित्यवर्णंतमसःपरस्तात॥९
प्रयाणकालेमनसाचलेनभक्त्यायु
क्तोयोगबलेनचैव॥भ्रुवोर्मध्येप्राण

मावेश्यसम्यक्सतंपरंपुरुषमुपै-
तिदिव्यं॥१०॥ यदक्षरंवेदविदोवदंति
विशंतियद्यतयोवीतरागाः॥ य
दिच्छंतोब्रह्मचर्यंचरंतितत्तेपदं॥

गी
९.

संग्रहेणप्रवक्षे ॥ ११ ॥ सर्वद्वारा
णिसंयम्य ॥ मनोहृदिनिरु
ध्यच ॥ मूर्ध्न्याधायात्मनःप्रा
ण ॥ मास्थितोयोगधारणां ॥ १२ ॥

ओमित्येकाक्षरंब्रह्मव्याहरन्मामनु·
स्मरन्॥यःप्रयातित्यजंदेहंसयाति·
परमांगतिं॥१३॥अनन्यचेताःसततं
योमांस्मरतिनित्यशः॥तस्याहंसु·
लभःपार्थनित्ययुक्तस्ययोगिनः॥१४

मामुपेत्यपुनर्जन्मदुःखालयमशा
श्वतं॥ नाप्नुवंतिमहात्मानःसंसिद्
धिंपरमांगताः॥१५॥आब्रह्मभुवनाल्
लोकाःपुनरावर्तिनोर्जुन॥मामुपेत्य
तुकौंतेयपुनर्जन्मनविद्यते॥ १६॥

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणोवि-
दुः॥ रात्रिंयुगसहस्रांतांतेहोरात्रवि
दोजनाः॥१७॥ अव्यक्ताद्व्यक्तयःसर्वाः-
प्रभवंत्यहरागमे॥ रात्र्यागमेप्रली-
यंतेतत्रैवाव्यक्तसंज्ञके॥१८॥ भूतग्रा

गी
२२

मःसएवायंभूत्वाभूत्वाप्रलीयते॥रा
त्र्यागमेवशःपार्थप्रभवत्यहरागमे॥
परस्तस्मात्तुभावोन्योव्यक्तोव्यक्तात्
सनातनः॥यःससर्वेषुभूतेषुनश्यत्सु
नविनश्यति॥२०॥अव्यक्तोक्षरइत्युक्त

स्तमाहुः परमां गतिं ॥ यं प्राप्य न नि-
वर्तंते तद्धाम परमं मम ॥ २१ ॥ पुरुषः स
परः पार्थ भक्त्या लभ्यस्त्वनन्यया ॥ य-
स्यांतःस्थानि भूतानि येन सर्वमिदं त-
तं ॥ २२ ॥ यत्र काले त्वनावृत्तिमावृत्तिं चैव

योगिनः॥प्रयातायांतितंकालंवक्ष्या
मिभरतर्षभ॥२३॥अग्निर्ज्योतिरहःशु
क्लःषण्मासाउत्तरायणं॥तत्रप्रया
तागच्छंतिब्रह्मब्रह्मविदोजनाः॥धूमो
रात्रिस्तथाकृष्णःषण्मासादक्षिणायनं

त्रचांद्रमसंज्योतिर्योगीप्राप्यनिव-
र्तते॥ शुक्लकृष्णेगतीह्येतेजगतःशा
श्वतेमते॥ एकयायात्यनावृत्तिमन्य
यावर्ततेपुनः॥ नैतेसृतीपार्थजान
न्योगी॥ मुह्यतिकश्चनः॥ तस्मात्सर्वेषु

कालेषुयोगयुक्तोभवार्ज्जुन ॥२७॥ वेदे
षुयज्ञेषुतपःसुचैवदानेषुयत्पुण्यप्र
फलंप्रदिष्टं ॥ अत्येतितत्सर्व्वमिदं
विदित्वायोगीपरंस्थानमुपैतिचा
द्यं ॥२८॥ इतिश्रीभगवद्गीतासूप

निषत्सुब्रह्मविद्यायांयोगशास्त्रेश्री
कृष्णार्जुनसंवादेमहापुरुषयोगोना
मष्टमोध्यायः ॥८॥ श्रीभगवानुवा
च ॥ इदंतुतेगुह्यतमंप्रवक्ष्याम्यनसू-
यवे ॥ ज्ञानंविज्ञानसहितंयज्ज्ञात्वामो

गी
९८

स्यसेऽशुभात् ॥ १ ॥ राजविद्या राजगुह्यं
पवित्रमिदमुत्तमं ॥ प्रत्यक्षावगमं ध
र्म्यं सुसुखं कर्त्तुमव्ययं ॥ २ ॥ अश्रद्दधा
नाः पुरुषा धर्मस्यास्य परंतप । अप्रा
प्य मां निवर्त्तंते मृत्युसंसारवर्त्मनि ॥ ३

मयाततमिदं सर्वं जगदव्यक्तमूर्ति-
ना ॥ मत्स्थानि सर्वभूतानि न चाहं ते-
ष्ववस्थितः ॥ ४ ॥ न च मत्स्थानि भूता-
नि पश्य मे योगमैश्वरं ॥ भूतभृन्न च-
भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

गी
९९

यथाकाशस्थितोनित्यंवायुःसर्वत्र
गोमहान्॥तथासर्वाणिभूतानिम
त्स्थानीत्युपधारय॥सर्वभूतानिकौं
तेयप्रकृतिंयांतिमामिकां॥कल्पक्ष
येपुनस्तानिकल्पादौविसृजाम्यहं॥

प्रकृतिंस्वामवष्टभ्यविसृजामिपुन:
पुनः॥भूतग्राममिमंकृत्स्नमवशंप्र
कृतेर्वशात्॥८॥नचमांतानिकर्मा
णिनिबध्नंतिधनंजय॥उदासीनव
दासीनमसक्तंतेषुकर्मसु॥९॥मत्

याध्यक्षेणप्रकृतिःसूयतेसचराच-
रं॥हेतुनानेनकौंतेयजगद्विपरिव
र्तते॥१०॥अवजानंतिमांमूढा
मानुषींतनुमाश्रितं॥परंभाव-
मजानंतोममभूतमहेश्वरं॥११॥

मोघाशा मोघकर्माणो मोघज्ञाना वि-
चेतसः ॥ राक्षसीमासुरीं चैव प्रकृतिं
मोहिनीं श्रिताः ॥ महात्मानस्तु मां पा-
र्थ दैवीं प्रकृतिमाश्रिताः ॥ भजंत्यन-
न्यमनसो ज्ञात्वा भूतादिमव्ययं ॥ १२ ॥

गी
९८

सततंकीर्तयंतोमांयतंतश्चदृढव्र-
ताः॥ नमस्यंतश्चमांभक्त्यानित्ययु
क्ताउपासते॥१४॥ ज्ञानयज्ञेनचाप्य-
न्येयजंतोमामुपासते॥ एकत्वेन-
पृथक्त्वेनबहुधाविश्वतोमुखं॥१५॥

अहंक्रतुरहंयज्ञः स्वधाहमहमौष
धं ॥ मंत्रोहमहमेवाज्यमहमग्निरहं
हुतं ॥ १६ ॥ पिताहमस्यजगतोमाता
धातापितामहः ॥ वेद्यंपवित्रमोंकार
ऋक्सामयजुरेवच ॥ १७ ॥ गतिर्भर्ता

प्रभुःसाक्षीनिवासःशरणंसुहृत्
प्रभवःप्रलयस्थानंनिधानंबीज-
मव्ययं॥१८॥तपाम्यहमहंवर्षं
निगृह्णाम्युत्सृजामिच॥ अमृतंचै
वमृत्युश्चसदसच्चाहमर्जुन॥१९॥

त्रैविद्यामांसोमपाःपूतपापायज्ञैरि
ष्ट्वास्वर्गतिंप्रार्थयंते॥ तेपुण्यमासा
द्यसुरेंद्रलोकमश्नंतिदिव्यांदिविदे
वभोगान्॥ तेतंभुक्त्वास्वर्गलोकंवि
शालंक्षीणेपुण्येमर्त्यलोकंविशंति

गी
९८

एवं त्रयीधर्ममनुप्रपन्ना गतागतं का
मकामा लभंते ॥२१॥ अनन्याश्चिंतयं
तो मां ये जनाः पर्युपासते ॥ तेषां नि
त्याभियुक्तानां योगक्षेमं वहाम्यहं ॥ २२
ये प्यन्यदेवताभक्ता यजंते श्र

द्धयान्विताः॥ तेपिमामेवकौंतेयय-
जंत्यविधिपूर्वकं॥२३॥ अहंहिसर्वय-
ज्ञानांभोक्ताचप्रभुरेवच॥ नतुमामभि-
भिजानंतितत्वेनातश्च्यवंतिते॥ २४॥
यांतिदेवव्रतांदेवांपितॄन्यांतिपितृव्रत

नौ:

गी ९१ द्र ॥ भूतानि यांति भूतेज्या यांति मद्या-
जिनोपि मां ॥ २५ ॥ पत्रं पुष्पं फलं तोयं यो
मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृत
मश्नामि प्रयतात्मनः ॥ २६ ॥ यत्करो-
षि यदश्नासि यज्जुहोसि ददासि यत् ॥

यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्प
णं॥२७॥शुभाशुभफलैरेवंमोक्ष्यसे
कर्मबंधनैः॥संन्यासयोगयुक्तात्मा
विमुक्तोमामुपैष्यसि॥२८॥समोहं
सर्वभूतेषुनमेद्वेष्योस्तिनप्रियः॥

गी
१५

येभजंतितुमांभक्त्यामयितेतेषुचा-
प्यहं॥अपिचेत्सुदुराचारोभजतेमाम
नन्यभाक्॥साधुरेवसमंतव्यःस-
म्यग्व्यवसितोहिसः॥३०॥क्षिप्रंभव
तिधर्मात्माशश्वच्छांतिंनिगच्छति॥

कौंतेयप्रतिजानीहिनमेभक्तःप्र
णश्यति॥मांहिपार्थव्यपाश्रित्यये
पिस्युःपापयोनयः॥स्त्रियोवैश्या
स्तथाशूद्रास्तेपियांतिपरांगतिं॥३२
किंपुनर्ब्राह्मणाःपुण्याभक्ताराजर्ष

गी.
१०२

यस्तथा ॥ अनित्यमसुखंलोकमिमं
प्राप्य भजस्व मां ॥३३॥ मन्मना भव म-
द्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवै
ष्यसि युक्त्वैवमात्मानं मत्परायणः ॥३४
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्म

विद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसं
वादेराजविद्याराजगुह्ययोगोनामनवमोऽ
ध्यायः ॥९॥ श्रीभगवानुवाच ॥ भूयए
वमहाबाहोशृणुमेपरमंवचः ॥ य-
त्तेहंप्रीयमाणायवक्ष्यामिहितका

गी.
१०४

म्यया॥ नमेविदुःसुरगणाःप्रभवंनम
हर्षयः॥ अहमादिर्हिदेवानांमहर्षी
णांचसर्वशः॥२॥ योमामजमनादिं
चवेत्तिलोकमहेश्वरं॥ असंमूढः
समर्त्येषुसर्वपापैःप्रमुच्यते॥३॥

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः

शमः ॥ सुखं दुःखं भवो भावो भयं चा

भयमेव च ॥ ४ ॥ अहिंसा समता तुष्टि

स्तपो दानं यशो यशः ॥ भवंति भावा

भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥ स-

गी
१५

हर्षयःसप्तपूर्वेचत्वारोमनवस्तथा
मद्भावामानसाजातायेषांलोकइ
माःप्रजाः ॥६॥ एतांविभूतियोगंच
ममयोवेत्तितत्वतः ॥ सोविकंपे
नयोगेनयुज्यतेनात्रसंशयः ॥७॥

अहंसर्वस्यप्रभवोमतःसर्वंप्रवर्तते
इतिमत्वाभजंतेमांबुधाभावसमं
न्विताः॥८॥मच्चित्तामद्गतप्राणाबोध
यंतःपरस्परं॥कथयंतश्चमांनित्यं
तुष्यंतिचरमंतिच॥९॥तेषांसततयु

गी
१०९
कानां भजतां प्रीतिपूर्वकं ॥ ददामि बु
द्धियोगं तं येन मामुपयांति ते ॥१०॥
तेषामेवानुकंपार्थमहमज्ञानजं
तमः ॥ नाशयाम्यात्मभावस्थो ज्ञा
नदीपेन भास्वता ॥११॥ अर्जुन उवाच ॥

परंब्रह्मपरंधामपवित्रंपरमंभवा
न्॥ पुरुषंशाश्वतंदिव्यमादिदेवम
जंविभुं॥१२॥आहुस्त्वामृषयःसर्वेदे
वर्षिर्नारदस्तथा॥ असितोदेवलो
व्यासःस्वयंचैवब्रवीषिमे॥१३॥सर्व

गी १०

मेतदृतं मन्ये यन्मां वदसि केशव ॥
न हि ते भगवन्व्यक्तिं विदुर्देवा न दा-
नवाः ॥ १४ ॥ स्वयमेवात्मनात्मानं वे
त्थ त्वं पुरुषोत्तम ॥ भूतभावन भूते
श देवदेव जगत्पते ॥ १५ ॥ वक्तुमर्ह-

स्यशेषेणदिव्याह्यात्मविभूतयः॥
याभिर्विभूतिभिर्लोकानिमांस्त्वंव्या-
प्यतिष्ठसि॥१६॥कथंविद्यामहंयो-
गिंस्त्वांसदापरिचिंतयन्॥केषुकेषु
चभावेषुचिंत्योसिभगवन्मया॥वि- गि

गी
१०९

स्तरेणात्मनोयोगंविभूतिंचजना·
र्दन॥ भूयः कथयतृप्तिर्हिशृण्वतो
नास्तिमेमृतं॥ श्रीभगवानुवाच॥ ह
न्ततेकथयिष्यामिदिव्याह्यात्मविभू
तयः॥ प्राधान्यतःकुरुश्रेष्ठनास्त्यंतोवि

त्वरूपमे ॥ ९ ॥ यद्ब्रह्माब्रह्माण्डकेशास
र्वैभक्तनाशायस्थितः ॥ यद्ब्रह्मादैश्वमर
धेवभक्तानामकल्पववः ॥ १० ॥ यादिम
नामहेविस्तमोनिघोरविरेस्तुमान् ॥
मरीविसेकनामस्तिनतत्राणामहे ॥

गी
१०२

शशी ॥ वेदानां सामवेदोस्मि देवाना
मस्मि वासवः ॥ इंद्रियाणां मनश्चास्मि
भूतानामस्मि चेतना ॥ रुद्राणां शंक
रश्चास्मि वित्तेशो यक्षरक्षसां ॥ वसूनां
पावकश्चास्मि मेरुः शिखरिणामहं ॥ २३

पुरोधसांच मुख्यंमांविद्धिपार्थबृह
स्पतिं॥ सेनानीनामहंस्कंदःसरसाम
स्मिसागरः॥२४॥ महर्षीणांभृगुरहं
गिरामस्म्येकमक्षरं॥ यज्ञानांजपय
ज्ञोस्मिस्थावराणांहिमालयः॥२५॥

गी
१०

अश्वत्थ सर्ववृक्षाणां देवर्षीणां च ना
रदः ॥ गंधर्वाणां चित्ररथः सिद्धानां क
पिलो मुनिः ॥२६॥ उच्चैश्रवसमश्वानां
विद्धि माममृतोद्भवं ॥ ऐरावतं ग
जेंद्राणां नराणां च नराधिपं ॥२७॥

आयुधानामहं वज्रं धेनूनामस्मि का
मधुक ॥ प्रजनश्चास्मि कंदर्पः सर्पाण
णामस्मि वासुकिः ॥ अनंतश्चास्मि ना
गानां वरुणो यादसामहं ॥ पितृणा-
मर्यमश्चास्मि यमः संयमतामहं ॥ २९

गी.
१११

प्रह्लादश्चास्मि दैत्यानां कालः कलय
तामहं ॥ मृगाणांच मृगेंद्रोहं वैनते
यश्च पक्षिणां ॥ ३० ॥ पवनः पवतामस्मि
रामः शस्त्रभृतामहं ॥ झषाणांम
करश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१

सर्गाणामादिरंतश्चमध्यंचैवाहम
र्जुन॥अध्यात्मविद्याविद्यानांवादः
प्रवदतामहं॥३२॥अक्षराणामकारो
स्मिद्वंद्वःसामासिकस्यच॥अहमे
वाक्षयःकालोधाताहंविश्वतोमुखः

गी
११२

त्युः सर्वहरश्चाहमुद्भवश्च भविष्य
तां ॥ कीर्त्तिः श्रीर्वाक्च नारीणां स्मृति
र्मेधा धृतिः क्षमा ॥ बृहत्साम तथा सा
म्नां गायत्री छंदसामहं ॥ मासानां मा
र्गशीर्षोहमृतूनां कुसुमाकरः ॥३॥ ५

द्यूतंछलयतामस्मितेजस्तेजस्वि-
नामहं॥ जयोस्मिव्यवसायोस्मिसत्वं
सत्ववतामहं॥ वृष्णीनांवासुदेवोस्मि
पांडवानांधनंजयः॥ मुनीनामप्यहं
व्यासःकवीनामुशनाकविः॥३७॥

गी
११२


दंडोदमयतामस्मिनीतिरस्मिजि
गीषतां॥मौनंचैवास्मिगुह्यानांज्ञा-
नंज्ञानवतामहं॥यच्चापिसर्वभूता
नांबीजंतदहमर्जुन॥नतदस्तिवि-
नायत्स्यान्मयाभूतंचराचरं॥३९॥

नांतोस्ति मम दिव्यानां विभूतीनां प
रंतप ॥ एषतूद्देशतः प्रोक्तो विभूतेर
विस्तरो मया ॥ ४० ॥ यद्यद्विभूतिमत्स
त्वं श्रीमदूर्जितमेव वा ॥ तत्तदेवावग
च्छ त्वं मम तेजोंशसंभवं ॥ ४१ ॥ अथव

ते

गी ॥९

थावहुनैतेनकिंज्ञातेनतवार्ज्जु-
न॥विष्टभ्याहमिदंकृत्स्नमेकांशे-
नस्थितोजगत्॥४२॥इतिश्रीभगव
द्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशा-
स्त्रेश्रीकृष्णार्जुनसंवादेविभूति





योगोनामदशमोध्यायः॥१०॥ अर्जुनउ
वाच॥ मदनुग्रहायपरमंगुह्यमध्या
त्मसंज्ञितं॥ यत्वयोक्तंवचस्तेनमो
होयंविगतोमम॥१॥ भवाप्ययौहि
भूतानांश्रुतौविस्तरशोमया॥ त्वत्तः

गी
११५

कमलपत्रात्त महात्म्यमपिचाव्य
यं॥ एवमेतद्यथात्थत्वमात्मानंपर
मेश्वरं॥ द्रष्टुमिच्छामितेरूपमैश्वरं
पुरुषोत्तम॥३॥ श्रीभगवानुवाच॥
पश्यमेपार्थरूपाणिशतशोथसह

मन्यसेयदितच्छक्यंमयाद्रष्टुमितिप्रभो॥ योगेश्वर
ततोमेत्वंदर्शयात्मानमव्ययं॥

स्रशः॥ नानाविधानि दिव्यानि नाना
वर्णाकृतीनि च॥५॥ पश्यादित्यान्वसू
न्रुद्रानश्विनौ मरुतस्तथा॥ बहून्य
दृष्टपूर्वाणि पश्याश्चर्याणि भारत॥ ८
इहैकस्थं जगत्कृत्स्नं पश्याद्य सचरा

गी
११८

चरं॥ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमि
च्छसि॥नतुमांशक्यसेद्रष्टुमनेनैव·
स्वचक्षुषा॥दिव्यंददामितेचक्षुःप·
श्यमेयोगमैश्वरं॥ संजउवाच॥ए
वमुक्त्वाततोराजन्महायोगेश्वरो·

हरिः दर्शयामास पार्थाय परमं रू
पमैश्वरं ॥ ९ ॥ अनेकवक्त्रनयनमने
काद्भुतदर्शनं ॥ अनेकदिव्याभरणं
दिव्यानेकोद्यतायुधं ॥ १० ॥ दिव्यमा
ल्यांबरधरं दिव्यगंधानुलेपनं ॥ स

गी
११०

र्वाश्चर्यमयंदेवमनंतंविश्वतोमुखं
॥११॥ दिविसूर्यसहस्रस्यभवेद्युगप-
दुत्थिता॥ यदिभाःसदृशीसास्या-
